करणे घञ् । २घरट्टे (याँता) पेषणयन्त्रभेदे । भावे घञ् । २चालने घट्टनाक्रियायाम् भावे ल्युट् । अववट्टनं तत्रैवार्थे न० । "प्रदेशस्य बहुशोऽवघट्टनाद्योऽपि व्यथा" सुश्रुतः । युच् । तत्रैवार्थे स्त्री ।

**अवघट्टित** त्रि० अव+घट्ट—कर्म्मणि क्त । चालिते ।

**अवघर्षण** न० अव+घृष-ल्युट् । अधःस्थापयित्वा १घर्षणे सर्वतो २घर्षणे "दुर्न्यासात् व्रणवर्त्माविघर्षणम्" सुश्रुतः ३मार्जने च मलात्वघर्षणम् पात्रावघर्षणम्" सलिलैः शुद्धिरेतेषां गोबालैश्चावघर्षणात्" या०स्मृ० ।

**अवघात** पु० अव+हन-घञ् । १अवहनने तण्डुलादेर्वितुषी करणव्यापारे । अवघातश्च व्रीहिसंस्कारार्थः व्यापारभेदः तत्करणे यन्त्रासिद्धिः "व्रीहीन् प्रोक्षति व्रीहीनवहन्ति" इत्यादौ प्रोक्षणादिजन्यः । कालान्तरभाव्यवघातजनको व्यापारो व्रीहिनिष्ठः कल्पते प्रोक्षिता व्रीहय एवावघाताय कल्पन्ते" कुसु० तथाचावघातजन्यः संस्कारः व्रीहिनिष्ठ इति मीमांसकाः । नैयायिकास्तु "संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिषु" कुसु० उक्तेः पुरुषएव संस्कारोऽदृष्टविशेषो जन्यत इत्याहुः अवघातश्च धर्मिणि सत्येव तदीयवितुषीकरणरूपपरिस्कारस्वरूपः २हननमात्रे ३ताड़नमात्रे च "कर्णावघातैरपि ताड्यमाना दूरीकृतार्का करिवरेण" "अधरे दन्तदन्तावघाते" सा०द० ।

**अवघातिन्** त्रि० तव+हन—णिनि । अवघातके स्त्रियां ङीप् ।

**अवघुष्ट** त्रि० अव+घुष—क्त । घोषणया प्रचारिते ।

**अवघूर्ण्णन** न० अव+घूर्ण्ण—भ्रमणे भावे ल्यु । सर्व्वतोभ्रमणे।

**अवघोटित** अव+घुट—परिवर्त्ते क्त । सर्व्वतोवेष्टिते समन्तात् परिवृते । सद्ब "शिविकया प्रायादवघोटितया स्वनगरमनुप्राप्य" भा०व०प० । [युच् । अवघोषणाप्यत्र स्त्री

**अवघोषण** न० अव+घुष—भावे ल्युट् । सर्व्वजनज्ञानायोच्चैर्घोषणे

**अवघ्राण** न० अव+घ्रा—भावे ल्युट् । आघ्राणे "पिण्डपितृयज्ञवद्दानप्रभृति प्रागवघ्राणात्" का०२०,५,११ "अपघ्राणमितरेषु" का०२२,१०,४ । इदञ्च भोजनानुकल्पतया शिष्टै रुक्तम् । अतएव श्राद्धशेषभोजनस्यावश्यकतया उपवासदिने तदवघ्राणमात्रम् विहितम् "आघ्राय पितृसेवितमिति" स्मृतेस्तथाचरणम् ।

**अवचक्षण** त्रि० अव+चक्ष—ल्यु । निन्दिताख्यानकर्त्तरि "कुत्साभीक्ष्णयोरर्थे एतस्य तिङःपरत्वे अनुदात्तत्वम् ।

**अवचन** न० न वचनं कुत्सायां न०त० १निन्दायाम् । अभावे न०त० । २कथनाभावे "प्रकृतौचावचनात्" कात्या० २०,७,२१, "अवचनेऽग्निष्टोमः" । कात्या० २२,१,२ । न०ब० । ३वचनशून्ये त्रि० "शकुन्तला साध्वसादवचना तिष्ठति" । शकु० ।

**अवचनीय** त्रि० वक्तुमनर्हः वच—अर्हार्थे अनीयर् न० त० । १वक्तुमनर्हे अश्लीलादौ शब्दे "वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्" मनुः १वचनीयं निन्द्यम् न०त० । २निन्द्यभिन्ने त्रि० ।

**अवचय** पु० अव+चि—अच् । पुष्पफलाद्यादाने । "ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ" शकु० ।

**अवचाय** पु० अव+चि "हस्तादाने चेरस्तेये" पा० अचोबाधको घञ् । हस्तेन पुष्पफलाद्यादाने । "अविरतकुसुमावचायखेदा" माघः । अव+चि—णमुल् अवचायम् । अभीक्ष्णमवचित्येत्यर्थे अव्य० ।

**अवचारण** त्रि० अव+चर—णिच्—ल्युट् । १प्रचारणे सुश्रुतोक्ते २क्षारपाकविधौ च "विशेषक्रियावचारणाच्च" "स्तेलाणि ग्रहणं जातीः पोषणं सावचारणम्" शुक्रदोषक्षयकरं यथाक्षमवचारणम्" सुश्रुतः ।

**अवचूड**(ल) पु० अवनता चूड़ाग्रं यस्य वा डोलः । १ध्वजाधोबद्धे वस्त्रे । "पिच्छावचूड़कलनामिवोरः" "पिच्छावचूड़मनुमाधवधाम जग्मुः" इति च माघः "अस्योच्चूड़ावचूड़ाख्यौ मल्लाधोमुखचूड़योरिति" हला०उक्तेः २ध्वजाधोमुखाङ्के चामरादौ च ।

**अवचूर्णन** न० सुश्रुतोक्ते १व्रणरोगभेदे । "तत्र व्रणस्य षष्टिरुपक्रमा भवन्ति" इत्युपक्रम्य "सर्पिस्तैलं रसक्रियावचूर्णन व्रणधूपनम्" इत्युक्त्वा "तेषु कषायो वर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचूर्णनमिति शोधनरोपणानीति" । अव+चूर्ण—भावे ल्युट् । २पेषणे । चूर्णैरध्वंसते अवचूर्णयति अव+चूर्ण+अवध्वंसार्थे णिच्—भावे ल्युट् । ३चूर्णेनावध्वंसे ।

**अवचूर्णित** त्रि० अव+चूर्ण—पेषे कर्म्मणि क्त । १पिष्टे । अवचूर्णयतेर्नामधातोः क्त । २चूर्णेनावध्वस्ते ।

**अवचूल** न० अवचूड़वत् विग्रहः । ध्वजाधःस्थे १चामरादौ ध्वजाद्यङ्के "दिवसकरवारणस्यावचूलचामरकलाप इव" काद० । [चामरे त्रिका० ।

**अवचूलक** न० अवचूलमिव इवार्थे कन् संज्ञायां वा कन् ।

**अवच्छिन्न** त्रि० अव+छिद—क्त । अवच्छेदः विशेषणोपाधिना विशेषकरणम् । उपाध्यादिना विशेषिते अवच्छेदकतानिरूपिते च "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगिताच्छेदकावच्छिन्नं यन्न